यदा प्रधानेनापेक्ष्यन्ते तदा युगपद्भावेनैव यौगपद्येनैव सहैव सम्बन्धं प्राप्नुवन्ति न क्रमेण। ततस्तेषां नियमेन क्रमेणानुष्ठाने कारणाभावात् कर्तुरेकत्वादवश्यम्भाविनि क्रमे येन केनचिदनियतेन क्रमेणानुष्ठानम्”भा०

“अर्थनिर्वृत्तेश्च” २सू०। “येन केनचित्क्रमेणाङ्गानुष्ठाने क्रियमाणे अर्थनिर्वृत्तिरङ्गकलापनिष्पत्तिः सुखेनैव भवति नियतक्रमेण क्रियमाणे तु नियतक्रमस्यानागतस्य वस्तुतः प्रतीक्षणेन विलम्बाद्बहुना कालेन स्यात् तथा सति प्रयोगे प्राशुभावो न स्यात् प्रधानप्रत्यासत्त्या कालो ह्यङ्गानां विहितः अङ्गानां नियतक्रमेणानुष्ठाने च सोऽपि अतिक्रान्तः स्यादिति तस्मादङ्गानुष्ठाने क्रमनियमो नेति पूर्वः पक्षः। सिद्धान्तमाह”भा० “स्याद्वानुपूर्व्यं नियमः श्रुत्यर्थक्रमेभ्यः” ३सू०। वाशब्दः “पूर्वपक्षनिरासार्थः। अग्न्यन्वाधानादीनामङ्गकर्मणामानुपूर्व्यं नियमः स्यात् अनुष्ठाने क्रमनियमो भवेत् नानियमः। केभ्यः प्रमाणेभ्यः श्रुत्यर्थक्रमेभ्यः श्रुतेः अर्थात्क्रमाच्च। १श्रुतेस्तावत् यथा द्वादशाहे सत्त्रे“तेषां गृहपतिः प्रथमो दीक्षते”(शत० ब्रा०१२।१।१।१) “अथ ब्रह्माणं दीक्षयति अथोद्गातारम् अथ होतारमित्यादि” नात्र ब्रह्मादीनां दीक्षा विधीयते यजमानत्वादेव तस्याः प्राप्तेः क्रमस्य त्वन्यतः प्राप्त्यभावात् स एवात्र विधीयते। तथा “तस्मादेष दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियते” इति शत० ब्रा० (४।१।५।१६) अयमपि श्रुतिक्रम एव। २अर्थादपि क्रमोऽवगम्यते तद्यथा पेषणसे-यवनयोरवघातपेषणयोश्च “अग्निहोत्रं जुहोति यवागूं पचतीति” क्रमेण श्रुतेऽपि अर्थात् पूर्वं पाकस्ततो होम इति होमद्रव्यं हि यवागूः तदुत्पत्त्यर्थः श्रुत्या लिङ्गेन च पाकः। स च पश्चात् क्रियमाणोऽनर्थकः स्यात् होमोऽप्यसति द्रव्ये न निर्वर्त्तेत अतः पक्त्वा होमः कार्य्यः। ३क्रमः पाठक्रमः। स च द्विविधः श्रुतिपाठक्रमो मन्त्रपाठक्रमश्च, उभयविधोऽपि क्रमनियमे कारणं भवति, नियतेन हि क्रमेण पदार्थविधिपाठो मन्त्रपाठश्च वर्त्तते। तत्रैवमवगम्यते येन क्रमेण पदार्थविधिपाठो मन्त्रपाठश्च तेनैव क्रमेणानुष्ठानमिति क्रमान्तरेणानुष्ठाने त्ववगतस्य क्रमस्य त्यागः अनवगतस्य क्रमस्योपादानमित्यसंगतं स्यात् तस्मात् पाठक्रमादपि क्रमनियमोऽङ्गकर्म्मणां भवतीति” क.क.भाष्यम्

“प्राकृतं च विकृतौ” ४सू०। “अतोऽपि कारणात् पाठक्रमेणाङ्गकर्मणामनुष्ठानं भवति यतो विकृतौ प्राकृतमेव क्रमं श्रुतिरनुवदति यथा महापितृयज्ञे “स मन्त एव प्राङ्गृह्णाति स्रुच्ययजुर्हरति”इत्यादिना“स यज्ञोपवीती भूत्वाज्यानि गृह्णातीत्येवमन्तेन” (शत०ब्रा०२।६।१।१२) अत्राज्यग्रहणे यज्ञोपवीतित्वविधिपरे वाक्ये प्राकृतं क्रमं दर्शयति यदि पाठक्रमेणानुष्ठानं न स्यात् तदानेनैव क्रमेणानुवादो न स्यात्। अपरे त्वन्यथा व्याचक्षते प्राकृतं च विकृतौ, विकृतौ प्राकृतवैकृतयोः कर्मणोः संनिपाते प्राकृतं पूर्वं कर्त्तव्यम् पश्चात् वैकृतमिति। तद्यथा “प्रकृतौ प्रास्य तृणं चक्षुष्पा” इत्यात्मानमालभेत” इति (कात्या० ३।६।१५) प्रस्तरतृणानुप्रहरणानन्तरमात्मालम्भ उक्तः विकृतौ च “प्रहृत्य तृणं तेन चरतीति” कात्या० (४।४।११) तृणानुप्रहरणानन्तरं वाजिनयाग उक्तः तत्र पूर्वं प्राकृतमात्मालम्भोदकस्पर्शरूपं कृत्वा पश्चाद्वाजिनयागः कर्तव्यः। तथा प्रकृतौ हविरासादनोत्तरकालं हविरालम्भात्मालम्भोदकालम्भाः विहिताः विकृतौ च“आसाद्य हवींष्यग्निं मन्थति”इत्यग्निमन्थनम्, (शत० ब्रा० ३।४।१।१९) हविरासादनोत्तरकालं विहितम् तत्र पूर्वं प्राकृता हविरालम्भात्मालम्भोदकालम्भाः, पश्चाद्वैकृतमग्निमन्थनम्। एवम् “अथासाद्य स्रुचोऽप उपसृश्य राजानं प्रपादयति” (शत० ब्रा० ३।६।३।१७) इत्येतदप्युदाहार्यम्, अत्रापि पूर्वं प्राकृता हविरालम्भात्मालम्भोदकालम्भाः पश्चाद्वैकृतं सोमप्रपादनादि। तथा पितृयज्ञे परिषेकात् प्रागिडाभक्षणमाज्येनपवित्रप्रतिपत्तिर्दक्षिणादानान्यत्र एव सिद्धानि। सुत्यायां च सवनीयपुरोडाशानां निर्वपणादूर्ध्वभाविनः प्रागलङ्करणाद्ये पदार्थाः तेषां प्राक्प्रचरणीयहोमादनुष्ठानं सिद्धम्। अतएव पशौ प्राकृतं पूर्वमित्यस्य बाधनाय यत्नं करोति “उत्तराघारमाघार्य पशुं पूर्वं समनक्तीति” (कात्या० ६।४।२सू०) अत्र पूर्वमित्यनेन प्राकृतध्रुवासमञ्जनात् पूर्वं पशुसमञ्जनं विदधाति। तस्मात्समीचीनमेतद्व्याख्यानम्। अथ क्रमप्रमाणानां विरोधे बलाबलं निर्णीयते। यत्र पाठक्रमार्थक्रमयोर्विरोधो भवति तद्यथा। स वै “पर्णशाखया वत्सानपाकरोति तामाच्छिनत्तीति” (शत० ब्रा० १।७।१।१।२) पाठक्रमः अर्थक्रमस्त्वनेन क्रमेण न सिध्यति न ह्यच्छिन्नया वृक्षस्थया शाखया वत्सापाकरणं कर्तुं शक्यते वत्सापाकरणायैव च छेदनमिति तत्र किं पाठक्रमाध्यवसानम्? उतार्थक्रमादिति? संशये आह” कर्कभाष्यम्